संस्कृत

क्र.नं. ९३८

राजवाडे

स्तोत्र

(९४

अंक ९४ शाखा तंत्र

ग्रंथनाम स्वप्रकाशलीस्तोत्र

ग्रंथकार

काल पृष्ठ

स्थल

पृ. ५७ ते ६८

६९८ / स्तो. ४९४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1) त्यावहुभिरिह रूपैर्यदा स्थिता ॥ तत्संहृतंमये
कैव तिष्ठाम्याजौ स्थिरो भव ॥ ५ ॥ ७ ऋषिरुवाच ॥
ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्य
तां सर्वदेवानामसुराणां च दारुणं ॥ ६ ॥ शरवर्षैः
शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धम
भूद्भूयः सर्वदेवभयंकरं ॥ ७ ॥ दिव्यान्यस्त्राणि श
तशो मुमुचे यान्यथांबिका ॥ बभंज तानि दै
त्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥ मुक्तानि तेन चा
स्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्र
हुंकारोच्चारणादिभिः ॥ ९ ॥ ततः शरशतैर्देवी

Joint project of the Rajavade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

मा च्छादयत सोसुरः॥ सापि तत्कुपिता देवी धनुश्चि
॥५९॥ छेद चेषुभिः॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्ति
मुपाददे॥ चिछेद देवी चक्रेण तामप्यस्य करे स्थि
तां॥११॥ ततः खड्गमुपादाय शतचंद्रं च भानुम
त्॥ अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः॥
॥१२॥ तस्यापतत एवाशु खड्गं चिछेद चंडिका॥
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं॥१३॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः॥
जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः॥१४॥ १७
चिछेदापततस्तस्य मुद्गरं निशितैः शरैः॥ त ॥५९॥
थापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥१५॥ १८

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

सम्तुष्टिं पालयामास हृदये दैत्यपुंगवः॥देव्या
स्तं चापि सा देवी तलेनोरस्यताडयत्॥१६॥तल
प्रहाराभिहतो निपपात महीतले॥स दैत्यराजः
सहसा पुनरेव तथा स्थितः॥१७॥उत्पत्य च प्रगृ
ह्योच्चैर्देवीं गगनमास्थितः॥तत्रापि सा निराधा
रा युयुधे तेन चंडिका॥१८॥नियुद्धं खे तदा दैत्य
श्चंडिका च परस्परं॥चक्रतुः प्रथमं सिद्धमुनिवि
स्मयकारकं॥१९॥ततो नियुद्धं सुचिरं कृत्वा तेनां
बिका सह॥उत्पात्य भ्रामयामास चिक्षेप धर
णीतले॥२०॥स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्य

Joint project of the Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(3)

॥५२॥ म्यवेगतः॥ अभ्यधावतदुष्टात्माचंडिकानिधनेछ
या॥२४॥तमायांतंततोदेवीसर्वदैत्यजनेश्वरं॥ज
गत्यांपातयामासभित्वाशूलेनवक्ष सि॥२५॥सग
तासुःपपातोर्व्यांदेवीशूलाग्रविक्षितः॥चालय
न्त्सकलांपृथ्वींसाब्धिद्वीपांसपर्वतां॥२६॥ततः
प्रसन्नंसकलंहतेतस्मिन्दुरात्मनि॥जगत्स्वास्थ्य
मतीवापनिर्मलंचाभवन्नभः॥२४॥उत्पातमेघाः
सोल्कायेप्रागासंस्तेशमंययुः॥सरितोमार्गवा
हिन्यस्तथासंस्तत्रपातिते॥२५॥ततोदेवगणाः
सर्वेहर्षनिर्भरमानसाः॥बभूवुर्निहतेतस्मिन्ग ॥५२॥

(3A)

नोधर्वा ललितंजगुः ॥ २९ ॥ अवादयंस्तथैवान्येन
नृतुश्चाप्सरोगणाः ॥ ववुःपुण्यास्तथावाताः सुप्र
भोभूद्दिवाकरः ॥ ३१ ॥ जज्वलुश्चाग्नयः शांताः शां
ता दिग्जनितस्वनाः ॥ ३२ ॥ ॥ इति मार्कंडेयपु
राणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभवधो ना
म दशमोध्यायः ॥ ॥ ऋषिरुवाच ॥ ० ॥
देव्याहते तत्र महासुरेंद्रे सेंद्राः सुरावह्निपुरोगमास्तां ॥
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्राब्जविक
कासिताशाः ॥ १ ॥ देवाऊचुः ॥ देविप्रपन्नार्तिहरे
प्रसीद प्रसीदमातर्जगतोखिलस्य ॥ प्रसीदविश्वे

Joint Project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7)

॥ दु ॥ श्वरिपाहि विश्वं त्वमीश्वरी देवि चरांचरस्य ॥ २ ॥ आ
धारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थि
तासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते कृ
त्स्नमलंघ्यवीर्ये ॥ ३ ॥ त्वं वैष्णवी शक्तिरनंतवीर्या
विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि सम
स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ४ ॥ विद्याः स
मस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥
त्व ॥ त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्य
परापरोक्ता ॥ ५ ॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्र
दायिनी ॥ त्वं स्तुता स्तुतये का वा भवंतु परमोक्त ॥ दु ॥

यः॥ ६॥ सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थिते॥
स्वर्गापवर्गदेदेविनारायणिनमोस्तुते॥ ७॥ कला
काष्ठादिरूपेणपरिणामप्रदायिनि॥ विश्वस्योप
रतौशक्तेनारायणिनमोस्तुते॥ ८॥ सर्वमंगलमां
गल्येशिवेसर्वार्थसाधिके॥ शरण्येत्र्यंबकेगौरि
ना०॥ ९॥ सृष्टिस्थितिविनाशानांशक्तिभूतेसना
तनि॥ गुणाश्रयेगुणमयेना०॥ १०॥ शरणागतदी
नार्तपरित्राणपरायणे॥ विश्वस्यार्तिहरेदेविना०
॥ ११॥ हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि॥
कौशांभःक्षरिकेदेविना०॥ १२॥ त्रिशूलचंद्राहि

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

॥५४॥ धरेमहावृषभवाहिनि॥माहेश्वरीस्वरूपेणना०॥१३॥
मयूरकुक्कुटवृतेमहाशक्तिधरेनघे॥कौमारीरूप
संस्थानेना०॥१४॥शंखचक्रगदाशार्ङ्गगृहीत
परमायुधे॥प्रसीदवैष्णवीरूपेना०॥१५॥गृहीतोग्र
महाचक्रेदंष्ट्रोद्धृतवसुंधरे॥वराहरूपिणिशिवेना०
॥१६॥नृसिंहरूपेणोग्रेणहंतुंदैत्यान्कृतोद्यमे॥
त्रैलोक्यत्राणसहितेना०॥१७॥किरीटिनिमहा
वज्रेसहस्रनयनोज्वले॥वृत्रप्राणहरेचैंद्रिना०
॥१८॥शिवदूतीस्वरूपेणहतदैत्यमहाबले॥घोर
रूपेमहारावेना०॥१९॥दंष्ट्राकरालवदनेशिरो ५४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

मालाविभूषणे॥ चामुंडे मुंडमथने ना०॥२०॥ ल
क्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे॥ महारात्रि
२म महामाये ना०॥२१॥ मेधे सरस्वति वरे भूति बाभ्रवि
तामसि॥ नियते त्वं प्रसीदेशे ना०॥२२॥ सर्वस्वरूपे
सर्वेशे सर्वशक्तिसमन्विते॥ भयेभ्यस्त्राहि नो देवि
दुर्गे देवि नमोस्तु ते॥२३॥ एतत्ते वदनं सौम्यं लोच
नत्रयभूषितं॥ पातु नः सर्वभीतिभ्यः कात्यायनि
नमोस्तु ते॥२४॥ ज्वालाकरालमत्युग्रमशेषासु
रसूदनं॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु
ते॥२५॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या ज

Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥५५॥ गतं॥ साघंरापालुनोदेवि पापेभ्योनः सुतानिव॥
॥२६॥ असुरासृग्वसापंकचर्चितस्तेकरोज्वलः॥
भशुभाय खड्गोभवतुचंडिके त्वांनतावयं॥२७॥
रोगानशेषानपहंसि तुष्टारुष्टातुकामान्सकला
नभीष्टान्॥त्वामाश्रितानांनविपन्नराणांत्वामा
श्रिताह्याश्रयतांप्रयांति॥२८॥एतत्कृतंयत्कद
नंत्वयाद्य धर्मद्विषांदेवि महासुराणां॥रूपैरने
कैर्बहुधात्ममूर्तिंकृत्वांबिके तत्प्रकरोतिकान्या॥
॥२९॥विद्यासुशास्त्रेषुविवेकदीपेष्वाद्येषुवाक्ये
षुचकात्वदन्या॥ममत्वगर्तेतिमहांधकारे ॥५५॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

विश्वामयस्यैतदातीव विश्वं ॥ ३० ॥ रक्षांसि यत्रोग्र
विषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानल
लो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ॥
33 ॥ ३१ ॥ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका
धारयसीति विश्वं ॥ विश्वेशवंद्या भवती भवंति वि
श्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३२ ॥ देवि प्रसीद प
रिपालय नोरिभीतेर्नित्यं यथासुरवधाद धुनैव
सद्यः ॥ पापानि सर्वजगतां प्रशमं नयाशु उत्पात
पाकजनितांश्च महोपसर्गान् ॥ ३३ ॥ प्रणतानां
प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवासिनां

Joint project of the Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

॥५६॥ मीड्ये लोकानां वरदा भव ॥ ३४ ॥ देव्युवाच ॥ ०
वरदाहं सुरगणा वरं यन्मनसेछथ ॥ तं वृणुध्वं प्रय
छामि जगतामुपकारकं ॥ ३५ ॥ देवा उचुः ॥ ० ॥
सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमे
व त्वया कार्यमस्मद्वैरिविनाशनं ॥ ३६ ॥ देव्युवा
च ॥ ० वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे ॥ शुं
भो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ३७ ॥ नं
दगोपकुले जाता यशोदागर्भसंभवा ॥ ततस्तौ ना
शयिष्यामि विंध्याचलनिवासिनी ॥ ३८ ॥ पुनर
प्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनि ॥५६

(7A)

ष्यामि वैप्रचित्तांस्तु दानवान्॥ ४०॥ भक्षयंत्याश्च
तानुग्रान्वैप्रचित्तान्महासुरान्॥ रक्तादंता भविष्यं
ति दाडिमीकुसुमोपमाः॥ ४१॥ ततो मां देवताः स्व
र्गे मर्त्यलोके च मानवाः॥ स्तुवंतो व्याहरिष्यंति स
ततं रक्तदंतिकां॥ ४२॥ पु[illegible]नारी भूयश्च शतवा
र्षिक्यामनावृष्ट्यामनंभसि॥ मुनिभिः संस्तुता
भूमौ संभविष्याम्ययोनिजा॥ ४३॥ ततः शतेन
नेत्राणां निरीक्षिष्यामि यन्मुनीन्॥ कीर्तयिष्यंति
मनुजाः शताक्षीमिति मां ततः॥ ४४॥ ततोहम
खिलं लोकमात्मदेहसमुद्भवैः॥ भरिष्यामि सु

(8)

॥५०॥ राः शाकैराहृतैः प्राणधारकैः॥४९॥ शाकंभरीति
विख्यातिं तदा यास्याम्यहं भुवि॥ तत्रैव च वधिष्या
मि दुर्गमाख्यं महासुरं॥४८॥ दुर्गा देवीति विख्या
तं तन्मे नाम भविष्यति॥ ॥ पुनश्चाहं यदा भीमरूपं
कृत्वा हिमालये॥४६॥ रक्षांसि भक्षयिष्यामि
मुनीनां त्राणकारणात्॥ ॥ तदा मां मुनयः सर्वे स्तो
१ ष्यंत्यानम्रमूर्तयः॥ ७॥१ भीमादेवीति विख्यातं
तन्मे नाम भविष्यति॥ यदारुणाख्यस्त्रैलोक्ये
महाबाधां करिष्यति॥४८॥ तदाहं भ्रामरं रूपं कृ
त्वासंख्येयषट्पदं॥ त्रैलोक्यस्य हितार्थाय वधि ॥५०॥

(8B)

५४

ष्यामि महासुरं ॥ ४९ ॥ भ्रामरीति च मां लोकास्त
दा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा दानवो
५५
त्था भविष्यति ॥ ५० ॥ तदा तदावतीर्याहं करिष्याम्य
रिसंक्षयं ॥ ५१ ॥ ५५ ॥ इति मार्कंडेयपुराणे सा
वर्णिके मन्वंतरे देवीमाहात्म्ये मन्वंतरे नारायणीस्तु
तिरेकादशोध्यायः ॥ ११ ॥ देव्युवाच ॥ ० १
एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयं ॥ १ ॥ २
मधुकैटभनाशं च महिषासुरघातनं ॥ कीर्त
३
यिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः ॥ २ ॥ अष्ट

ष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः॥ श्रोष्यं
ति चैव ये भक्त्या मम माहात्म्यमुत्तमं॥ ३॥ न
तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः॥ न भवि
ष्यति दारिद्र्यं न चैवेष्टवियोजनं॥ ४॥ शत्रुतो
न भयं तेषां दस्युतो वा न राजतः॥ न शस्त्रानल
तोयौघात्कदाचित्संभविष्यति॥ ५॥ तस्मान्म
मैतन्माहात्म्यं पठितव्यं समाहितैः॥ श्रोतव्यं च
सदा भक्त्या परं स्वस्त्ययनं महत्॥ ६॥ उपसर्गा
नशेषांस्तु महामारीसमुद्भवान्॥ तथा त्रिविध
मुत्पातं माहात्म्यं शमयेन्मम॥ ७॥ यत्रैतत्पठ्य

(9A)

तेसम्य।इंद्रिं॰त्समायतनेमम॥सदानत।हिंमोक्ष्या
मिसांनिध्यंतत्रमेस्थितं॥८॥बलिप्रदानेपूजाद्या
मग्निकार्येमहोत्सवे॥सर्वंममैतच्चरितमुच्चार्यं
श्राव्यमेवच॥९॥जानताज्ञानतावापिबलिपूजां
तथाकृतां॥अग्नौधि[illegible]ष्याप्यहंप्रीत्यावह्निहोमं
तथाकृतं॥च१०॥शरत्कालेमहापूजाक्रिय
तेयाचवार्षिकी॥तस्यांममैतन्माहात्म्यंश्रुत्वाभक्ति
समन्वितः॥११॥सर्वबाधाविनिर्मुक्तोधनधान्य
समन्वितः॥मनुष्योमत्प्रसादेनभविष्यतिनसंश
यः॥१२॥श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

शुभाः ॥ पराभक्रमं च युद्धेषु जायते निर्भयः पुमान्
॥८६॥ ॥१३॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥
नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां ॥१४॥ शां
तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडा
सुचोग्रासु माहात्म्यं शृणुयान्मम ॥१५॥ उपसर्गाः
शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं च नृभि
र्दृष्टं सुस्वप्नमुपजायते ॥१६॥ बालग्रहाभिभू
तानां बालानां शांतिकारकं ॥ संघातभेदे च नृणां
मैत्रीकरणमुत्तमं ॥१७॥ दुर्वृत्तानामशेषाणां ब
लहानिकरं परं ॥ रक्षोभूतपिशाचानां पठनादे ॥८७॥
वनाशनं ॥१८॥ सर्वं ममैतन्माहात्म्यं मम सां

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai
"Joint project of"

(10A)

निध्यकारकं ॥ पत्रपुष्पादिधूपैश्च गंधदीपैस्त
थोत्तमैः ॥ ३२ ॥ विप्राणांभोजनैर्होमैः प्रदक्षिणीयेर
हर्निशं ॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वस्तेरणाया
॥ ३० ॥ श्रीनिर्मेक्रियतसास्मिन्तस्य स्कंदुश्चरितेस्फुते ॥
स्फुतंहरतिपापानि तथारोग्यंप्रयछंति ॥ ३१ ॥ र
क्षांकरोति भूतेभ्यो जन्मनांकीर्तनंमम ॥ युद्धेषु
चरितंयस्मिंदुष्टदैत्यनिबर्हणं ॥ ३२ ॥ तस्मिन्छ्रुतेवै
रिकृतं कृतं भयं पुंसां नजायते ॥ युष्माभिः स्कुत
यायाश्चयाश्च ब्रह्मर्षिभिः कृताः ॥ ३३ ॥ ब्रह्मणा
चकृतायाश्च स्तीः ॥ स्तुत्य यछंतु शुभांमतिं ॥ अर

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com